तस्याः श्रीर्निश्चला गेहे सत्यं सत्यं हि नारद ! ॥
यथेन्द्राणी महेन्द्रस्य लक्ष्मीर्लक्ष्मीपतेर्यथा ।
शङ्करस्य यथा गौरी सापि भर्त्तुर्भवेत्तथा ॥
या पञ्चमीव्रतं कुर्य्यात् सा भवेच्च पतिव्रता ।
यथोक्तविधिना या तु कुर्व्वीत व्रतमुत्तमम् ॥
पुत्त्रपौत्त्रधनैश्वर्य्यं पद्मीकरणादपि ।
एतत्ते कथितं सर्व्वं तत्त्वं कमललोचन ! ॥
नारद उवाच ।
केनापि कथितं पूर्व्वं कृतं केनापि वा पुनः ।
प्राप्तं कुत्र त्वया देवि ! श्रोतुमिच्छामि तद्वद ॥
श्रीरुवाच ।
माघे मासि सिते पक्षे पञ्चम्याञ्च महामुने ! ।
निशावसानसमये चन्द्रभागां महानदीम् ॥
हंससङ्घैः समाकीर्णां नलिनीपुलिनोज्ज्वलाम् ।
तत्र गौरी शची मेधा सावित्री चोर्व्वशी परा ॥
नारायणं समारोप्य कुर्व्वन्ति व्रतमुत्तमम् ।
काम्यव्रतमिदं पद्मे ! लभते फलमुत्तमम् ॥
हर्षवतीञ्च तां वीक्ष्य प्रोवाच कमलालया ।
गृह्यस्व देहि मे धूपं दीपं नैवेद्यकम् ॥
मया तव प्रसादेन क्रियते व्रतमुत्तमम् ।
ततस्तासां फलैः पुष्पैर्नैवेद्यैस्तु व्रतं कृतम् ॥
ततस्तासां प्रसादेन वञ्चिताहं जनार्द्दन ! ।
त्वयि देव जगन्नाथ ! नरनारीगणेन च ॥
भक्त्या मया ते कथितं मर्त्त्यलोके प्रकाशितम् ।
या करोति व्रतं ह्येतत् यथाविधिविधानतः ॥
इह लोके सुखं भुक्त्वा नारायणपुरं व्रजेत् ।
श्रुत्वा व्रतस्य माहात्म्यं व्रतमेतत् चरन्ति याः ॥
न किञ्चिद्दुष्कृतं लोके तासां सत्यं वदाम्यहम् ।
हरन्ति तासां पापानि याश्च शृण्वन्त्यहर्निशम् ॥
नारायणं नमस्कृत्य प्रपूज्य च विसर्ज्जयेत् ॥"
इति भविष्यपुराणोक्ता षट्पञ्चमीव्रतकथा समाप्ता ॥

पञ्चमुखः, पुं, (पञ्च विस्तृतं मुखं यस्य सः ।) सिंहः । इति राजनिर्घण्टः ॥ (पञ्च मुखानि यस्य सः ।) शिवः । इति हेमचन्द्रः ॥ तस्य नामवर्णादि यथा, देवीपुराणे ।
"शिवस्तत्र स्थितः साक्षात् सर्व्वपापहरः शुभः ।
स तु पञ्चमुखः ख्यातो लोके सर्व्वार्थसाधकः ।
पञ्चब्रह्मात्मको यस्मात्तेन पञ्चमुखः स्मृतः ॥
पश्चिमे तु मुखे सद्यो वामदेवस्तथोत्तरे ।
पूर्व्वे तत्पुरुषं विद्यादघोरञ्चापि दक्षिणे ॥
ईशानः पञ्चमो मध्ये सर्व्वेषामुपरि स्थितः ।
एते पञ्च मुखा वत्स ! पापघ्ना ग्रहनाशनाः ॥
सद्योजातं भवेच्छुक्लं वामदेवन्तु पीतकम् ।
रक्तस्तत्पुरुषो ज्ञेयोऽघोरः कृष्णः स एव च ॥
ईशानः पश्चिमस्तेषां सर्व्ववर्णसमन्वितः ।
कामदः कामरूपी स्यात् ज्ञानाधारः शिवात्मकः ॥
(रुद्राक्षविशेषः । अस्य धारणतः शुभं भवति ॥ पञ्च मुखानि यस्य इति विग्रहे वाच्यलिङ्गत्वम् । यथा, रामायणे ।५।४१।२३। [ततः ।
"तस्य पञ्चायसांस्तीक्ष्णान् शितान् पञ्चमुखान् शिरस्युत्पलपत्राभान् दुर्द्धर्षः संन्यवेशयत् ॥")

पञ्चमुखी, स्त्री, (पञ्चमुखानीव सन्त्यस्याः ।) वासकः । इति राजनिर्घण्टः ॥ जवापुष्पविशेषश्च ॥ (पञ्च विस्तृतं मुखमस्याः । सिंहस्त्री ॥ सृष्टिकाले पञ्चमहाभूतान्येव पञ्चमुखानीव यस्याः शक्तेरित्यर्थः । शिवपत्नी । इति शब्दाम्बुधिः ॥)

पञ्चमुद्रा, स्त्री, (पञ्चविधा मुद्रा ।) पूजायां कर्त्तव्या पञ्चप्रकारमुद्रा । तस्या अनुष्ठानं यथा,—
"सम्यक् प्रपूरितः पुष्पैः कराभ्यां कल्पितोऽञ्जलिः ।
आवाहनी समाख्याता मुद्रा देशिकसत्तमैः ॥१॥
अधोमुखी त्वियञ्चेत् स्यात् स्थापनी मुद्रिका भवेत् ।२।
उच्छ्रिताङ्गुष्ठमुष्ट्योस्तु संयोगात् सन्निधापनी ॥३॥
अन्तःप्रवेशिताङ्गुष्ठा सैव सम्बोधनी मता । ४ ।
उत्तानमुष्टियुगला संमुखी करणी मता ॥"५॥
इति पूजाप्रदीपः ॥

पञ्चमूत्रं, क्ली, (पञ्चविधं मूत्रम् ।) गवाजामेषीमहिषीगर्द्दभीमूत्रम् । इति राजनिर्घण्टः ॥

पञ्चमूलं, क्ली, (पञ्चप्रकारं पञ्चगुणितं वा मूलम् ।) स्वनामख्यातपाचनम् । तत् त्रिविधं बृहत् स्वल्पं तृणाख्यञ्च । आद्यं यथा,—
"बिल्वश्योणाकगाम्भारीपाटलागणिकारिका ।
कफवातहरं श्रेष्ठं पञ्चमूलमिदं महत् ॥"
द्वितीयं यथा,—
"शालपर्णी पृश्निपर्णी बृहतीद्वयगोक्षुरम् ।
वातपित्तहरं वृष्यं कनीयः पञ्चमूलकम् ॥"
तृतीयं यथा,—
"कुशः काशः शरो दर्भ इक्षुश्चेति तृणोद्भवः ।"
इति चक्रपाणिदत्तः ॥
अपि च ।
"बिल्वाग्निमन्थश्योणाककाश्मर्य्यः पाटला तथा ।
ज्ञेयं बृहत् पञ्चमूलं पञ्चमूलमिति स्मृतम् ॥
शरेक्षुदर्भकाशानां नलस्य मूलमेव च ।
सौश्रुतञ्चारकञ्चैव तृणाख्यं पञ्चमूलकम् ॥"
इति शब्दचन्द्रिका ॥
(पञ्चानां मूलानां समाहारः । इति विग्रहे मूलपञ्चकम् ॥)

पञ्चमूली, स्त्री, (पञ्चानां मूलानां समाहारः । "द्विगोः ।" ४ । १ । २१ । इति ङीप् ।) स्वल्पपञ्चमूलपाचनम् । यथा,—
"शालपर्णी पृश्निपर्णी बृहती कण्टकारिका ।
तथा गोक्षुरकश्चैव पञ्चमूली कनीयसी ॥"
इति शब्दचन्द्रिका ॥

पञ्चयज्ञाः, पुं, (पञ्चविधा यज्ञाः ।) गृहस्थकर्त्तव्यपञ्चप्रकारयज्ञविशेषाः । यथा,—
"ब्रह्मयज्ञो नृयज्ञश्च देवयज्ञश्च सत्तम ! ।
पितृयज्ञो भूतयज्ञः पञ्चयज्ञाः प्रकीर्त्तिताः ॥"
इति पाद्मे क्रियायोगसारे १६ अध्यायः ॥
शूद्रमधिकृत्य,—
"नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत् ।"
इति तिथ्यादितत्त्वम् ॥
अस्य विवरणं पञ्चमहायज्ञशब्दे द्रष्टव्यम् ॥

पञ्चरक्षकः, पुं, (पञ्चगुणितानि रक्षका इव कण्टकानि यस्मिन् ।) पत्रपीडकः । इति राजनिर्घण्टः ॥

पञ्चरत्नं, क्ली, पञ्चानां रत्नानां समाहारः । (यद्वा पञ्चविधं पञ्चगुणितं वा रत्नम् ।) तद्यथा, कनकम् १ हीरकम् २ नीलमणिः ३ पद्मरागः ४ मुक्ता ५ । यथा,—
"कनकं हीरकं नीलं पद्मरागश्च मौक्तिकम् ।
पञ्चरत्नमिदं प्रोक्तमृषिभिः पूर्व्वदर्शिभिः ॥
रत्नानामप्यभावे तु स्वर्णं कर्षार्द्धमेव वा ।
सुवर्णस्याप्यभावे तु आज्यं ज्ञेयं विचक्षणैः ॥"
इति हेमाद्रिः ॥
कनकरजतप्रवालमौक्तिकराजपट्टात्मकमिति गौड़ाः ॥

पञ्चरसा, स्त्री, (पञ्च विस्तीर्णो रसोऽस्याम् ।) आमलकी । इति हारावली शब्दमाला च ॥

पञ्चरात्रं, क्ली, (पञ्चविधानि रात्राणि ज्ञानानि यत्र । समासे अच् ।) ग्रन्थविशेषः । यथा,—
"रात्रञ्च ज्ञानवचनं ज्ञानं पञ्चविधं स्मृतम् ।
तेनेदं पञ्चरात्रञ्च प्रवदन्ति मनीषिणः ॥
प्रथमं सात्त्विकं ज्ञानं द्वितीयन्तु तदेव च ।
नैर्गुण्यञ्च तृतीयञ्च ज्ञानञ्च सर्व्वतः परम् ॥
चतुर्थञ्च राजसिकं भक्तस्तन्नाभिवाञ्छति ।
पञ्चमं तामसं ज्ञानं विद्वांस्तन्नाभिवाञ्छति ॥
ज्ञानं पञ्चविधं प्रोक्तं पञ्चरात्रं विदुर्बुधाः ॥"
तत् सप्तविधं यथा,—
"पञ्चरात्रं सप्तविधं ज्ञानिनां ज्ञानदं परम् ।
ब्राह्मं शैवञ्च कौमारं वाशिष्ठं कापिलं परम् ॥
गौतमीयं नारदीयमिदं सप्तविधं स्मृतम् ॥"
इति नारदपञ्चरात्रे प्रथमरात्रम् ॥
अपि च ।
"पञ्चकं पञ्चरात्राणां कृष्णमाहात्म्यपूर्व्वकम् ।
वाशिष्ठं नारदीयञ्च कापिलं गौतमीयकम् ।
परं सनत्कुमारीयं पञ्चरात्रञ्च पञ्चकम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३२ अध्यायः ॥
एतदतिरिक्तानि हयशीर्षपृथुध्रुवादिपञ्चरात्राणि सन्ति ॥ (पञ्चानां रात्रीणां समाहारः ।) पञ्च निशाः । यथाह चक्रपाणिदत्तः ।
"त्रिरात्रं पञ्चरात्रं वा दशरात्रमथापि वा ।
लङ्घनं सन्निपातेषु कुर्य्यादारोग्यदर्शनात् ॥"

पञ्चलक्षणं, क्ली, (सर्गादि पञ्चविधानि लक्षणानि यत्र ।) पुराणम् । यथा,—
"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितञ्चैव पुराणं पञ्चलक्षणम् ॥"
इत्यमरभरतौ ॥
(पञ्चानां लक्षणानां समाहारः । इति विग्रहे पञ्चलक्षणानि ॥)

पञ्चलवणं, क्ली, पञ्चानां लवणानां समाहारः । (पञ्चगुणितं लवणमिति केचित् ।) तद्यथा,— काचम् । सैन्धवम् । सामुद्रम् । विड़म् । सौवर्च्चलम् । इति राजनिर्घण्टः ॥

पञ्चलाङ्गलकं, क्ली, (सुवर्णादिविभूषितदारुरच-